International Journal of Sanskrit Research 2021; 7(6): 142-144

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(6): 142-144
© 2021 IJSR
www.anantaajournal.com
Received: 10-09-2021
Accepted: 12-10-2021

**डाँ. निवेदितापति:**
महाराजाश्रीरामचन्द्रविश्वविद्यालय:
द्वितीयपरिसर:, केन्दुझरम्, ओडिशा, भारत

**Corresponding Author:**
**डाँ. निवेदितापति:**
महाराजाश्रीरामचन्द्रविश्वविद्यालय:
द्वितीयपरिसर:, केन्दुझरम्, ओडिशा, भारत

# पौराणिकपरम्परायां श्रीजगन्नाथस्य नवकलेवर:

**डाँ. निवेदितापति:**

**शोधसारांश:**
उत्कलप्रान्तस्य पुरीमण्डले तथा श्रीक्षेत्रे श्रीबलभद्रस्य श्रीजगन्नाथस्य देवीसुभद्राया: सुदर्शनस्य च दारुविग्रहस्य नवकलेवरं जायते । नवकलेवरं नाम नूतनशरीरम् । घटान्तरं पिण्डपरिवर्तनमप्युच्यते । एषा प्रक्रिया तु शास्त्रानुमोदिता वर्त्तते । अस्य नवकलेवरस्य अनेकासां प्रक्रियाणां वर्णना स्पष्टतया पद्मपुराणे, ब्रह्मपुराणे, स्कन्दपुराणे, श्रीमद्भागवते, निलाद्रीमहोदये इन्द्रनीलमणिपुराणे च भवति यस्या: सविस्तरं वर्णनं शोधप्रबन्धेऽस्मिन् क्रियते ।

**मुख्यबिन्दव:** उपासनामूर्त्ते: प्रकारभेदा:, नवकलेवरस्य विवर्तनम्, पद्मपुराणे नवकलेवरम्, ब्रह्मपुराणे नवकलेवरम्, स्कन्दपुराणे नवकलेवरम्, श्रीमद्भागवते नवकलेवरम्, निलाद्रीमहोदये नवकलेवरम्, इन्द्रनीलमणिपुराणे नवकलेवरम्

## १. आमुख:

श्रीमद्भगवद्गीतानुसारं मनुष्य: यथा पुरातनवस्त्रं त्यक्त्वा नूतनवस्त्रं धारयति तथैवात्मा जीर्णशरीरं परित्यज्य नूतनशरीरे प्रविशति । "यथा देहे तथा देवे" इत्यनुसारं मनुष्य: देवेष्वपि मानवत्वं परिकल्पयति । ब्रह्म: स्थिर: । शरीरं नाशशीलम् । अत: ब्रह्मण: स्थानान्तरणं शरीरस्य दारुविग्रहस्य वा परिवर्तनं भवति नवकलेवरसमये । कलेवरशब्द: प्रतीकोऽवयवोऽपघनोऽङ्गं गात्रं वपु: संहननं शरीरं वर्ष्म इत्यर्थेषु प्रयुक्तरित्यमर: । नवकलेवरं नाम नूतनशरीरम् । घटान्तरं पिण्डपरिवर्तनमप्युच्यते ।

**२. उपासनामूर्त्ते: प्रकारभेदा:** - पुराणेषु शिल्पशास्त्रेषु च मूर्त्तिनिर्माणप्रसङ्गे विविधा: मूर्त्तिनिर्माणप्रकारा: विद्यन्ते। यथा - विष्णुधर्मोत्तरपुराणे शिलादारुलौहभेदेन मूर्त्तय: त्रिविधारिति प्रोक्ता:।
"शिलादारुषु लोहेषु प्रतिमाकरणं भवेत्।"(३-४३-३२)
तथैव भुवनप्रकाशेन रेखादारुधातुमणिशैलभेदेन मूर्त्तय: चतुर्विधारिति प्रसिद्धा:।

> "मूर्त्ति: चतुर्विधा: प्रोक्ता: रेखा दारुमयीस्तथा ।
> सौम्याधातुमयी पुण्या मणिशैलोमयोत्तमा ।।"

दारुशब्दस्योल्लेख: ऋग्वेदे चतुर्षु स्थानेषु विद्यते । तद्यथा- षष्ठमण्डले वारमेकं (६.३.४), दशममण्डले वारत्रयञ्च (१०.१०२.८, १४६.४, १५५.३)। तदितरेषु वैदिकग्रन्थेष्वपि उल्लेखो वर्तते यत् दारुमूर्त्तेरुपासनया फलमाशु लभ्यते ।

**३. नवकलेवरस्य विवर्तनम्:** नवकलेवरप्रक्रिया कथं क्रमश: विधिवद्धतया व्यापकरूपतां तनोति तत् खलु मादलापाञ्जिकटकराजवंशावलीकपिलसंहितानीलाद्रिमहोदयब्रह्मपुराणपद्मपुराणस्कन्दपुराणप्रभृतिग्रन्थाश्रयेण परिशीलयितुं शक्यते । यद्यपि नवकलेवरप्रक्रियाया अभ्युत्थानं गच्छताकालेन प्रतिपादितमस्ति तथापि शास्त्रानुमोदितं वर्तते । तत् खलु ऐतिहासिकान्वेषणेन ज्ञायते यत् यदा यवनरक्तवाहु: श्रीजगन्नाथस्य ध्वंससाधयितुं यतमान: आसीत् तदा तत्रत्यै: सेवकै: देवप्रतिमा: पातालीकृता: । तस्मिन् भूतले पुरुषोत्तमस्य एकशतद्विनवतिसंवत्सरा: व्यतीता: । पुन: कश्चित् राजा तेषां पातालीभूतानां देवविग्रहाणां भूखननपूर्वकमुद्धरणं साधयामास । ततोऽतिजीर्णतया वस्त्रकण्डोलेषु तान् संगृह्य शकटयानेन सुवर्णपुरत: श्रीक्षेत्रं प्रति महता क्लेशेनानीय नूतनकलेवरान् निर्माय तेभ्य: कण्डोलकेभ्य: ब्रह्मतत्त्वानि संगृह्य नूतनकलेवरेषु

स्थापयित्वा सिंहासने श्रीविग्रहाणां प्रतिष्ठां कारयामास । जीर्णकलेवरान् "कोईलिवैकुण्ठे" इति तुलसीश्मशाने मृत्समाधि: दत्तवान् । मन्यते एष एव नवकलेवरस्य प्रथमप्रबन्ध: । अत: इमामैतिहासिकीं कथामाधारीकृत्येव वक्तुं शक्यते यत् न केवलं द्वादशवर्षव्यवधानेषु नवकलेवरं भवति अपितु यदा भगवतविग्रहाणां पातालीकरणं संसाध्यते तदा प्रभृति नवकलेवरस्य प्रबन्ध: आरभ्यते। अनेन प्रकारेणैव चतुर्द्दशशताब्द्या: नवकलेवरस्य विकासोऽभूत्।

**४. नवकलेवरस्य पौराणिकोल्लेख:** यद्यपि नवकलेवरस्य साक्षादेव पौराणिकोल्लेखो न वर्त्तते तथाप्यस्य कासांचित् प्रक्रियाणां वर्णना स्पष्टतया पद्मपुराणे, ब्रह्मपुराणे, स्कन्दपुराणे, श्रीमद्भागवते, निलाद्रीमहोदये इन्द्रनीलमणिपुराणे च भवति । वामदेवसंहितायां श्रीजगन्नाथमन्दिरस्य सविस्तरं वर्णनं भवति परं कुत्रापि प्रत्यक्षतया अप्रत्यक्षतया वा अस्य प्रसङ्गस्योल्लेख: नास्ति ।

**४.१. पद्मपुराणे नवकलेवरम्:** आषाढमलमासेषु नवकलेवरस्यायोजनं भवति यस्य मासस्य वर्णना पद्मपुराणे एव वर्त्तते । मलमासोऽयं पुरुषोत्तममासोऽप्युच्यते । इत्थं नामकरणे पद्मपुराणस्य पुरुषोत्तममाहात्म्ये विशदतया आख्यानमेकमस्ति यत् मलमासं विहाय प्रत्येकस्य मासस्येकोऽधिपति: वर्तते । फलत: मलमास: रुदित्वा विष्णो: शरणापन्नं गत: । तद्दृष्ट्वा भगवान् विष्णु: स्वकीयेन नाम्ना मलमासमाकारितवान् । तत: प्रभृति मलमास: पुरुषोत्तममासरित्युच्यते । पद्मपुराणे नवकलेवरसंघठितमासस्य विवरणं कथं पुरुषोत्तममासरित्यभिहितस्तत् विस्तरश: कथाप्रसङ्गेन प्रपञ्च्यते परन्तु एतदपि सत्यं यत् न केवलमाषाढस्य मलमास: पुरुषोत्तममासरुपेण आचक्ष्यते अपितु ये सर्वे मलमासा: ये विविधेषु संवत्सरेषु च आपतन्ति ते सर्वे एव पुरुषोत्तममासरूपेण परिचिता: । आषाढस्य मलमासाभ्यन्तरे दारुसंग्रह: दारुविग्रहस्य निर्माणं निर्मितविग्रहाणां प्रतिष्ठा प्रतिष्ठितविग्रहेषु घटपरिवर्त्तनं प्रभृतीनि सकलानि कार्याणि सम्पाद्यन्ते । मलमासे दारुविग्रहाणां परिवर्त्तनं कर्त्तुं यथेष्ट: काल: लभ्यते इति पद्मपुराणस्य आशय: ।

**४.२. स्कन्दपुराणे नवकलेवरम्:** स्कन्दपुराणेऽपि नवकलेवरप्रसङ्गे वर्णनमस्ति । तद्यथा दारुशब्दस्य व्याख्यानं दारुमूर्त्तेर्निर्माणञ्च । दारुशब्दस्य व्याख्यानं स्कन्दपुराणानुसारं भवति ।

> "खण्डनात् सर्वदु:खानां अखण्डानन्ददानत: ।
> स्वभावात् दारुरूपेण परंब्रह्माभिधीयते ।।"

अस्यार्थद्वयं वर्तते, यथा "दो धातो:" (अवखण्डने) इत्यनेन सर्वेषां दु:खानां खण्डनकारी इत्यर्थो द्योतितो भवति । "दा धातो:" (दाने) इत्यनेन आनन्दप्रदानकारी अर्थ: प्रतीत: । दारुमूर्त्तिनिर्माणं गोपनीयकार्यं भवति । स्कन्दपुराणस्याष्टादशाध्याये उल्लिखितं यत् नवकलेवरसमये दारुनिर्माणस्य शब्दं य: शृणोति स: जडान्धस्तथा नर्कवासि भवति । एतदर्थं विविधानां वाद्यानां वादनं करणीयम् । अस्य दर्शनवारणार्थं स्कन्दपुराणे भीत्युत्पादकवाक्यानि अपि सन्ति । स्कन्दपुराणान्तर्गतपुरुषोत्तममाहात्म्यस्याष्टविंशत्यध्याये नृसिंहमन्त्रस्य गुरुत्वं वर्णितं यस्यावश्यकता नवकलेवरसमये वहुषु स्थलेषु एव दृश्यते, यथा - दारुसंग्रहसमये, दारुच्छेदनात् प्रागेव, दारु-आनयनसमये दारुप्रतिष्ठायाञ्च । पुनश्चात्र वर्णिता: प्रतिमानिर्माणविधि:-स्वप्नदर्शनं-प्रतिमाप्रतिष्ठाप्रभृतय: नवकलेवरसम्बन्धिता: प्रथमकथा: ।

**४.३. ब्रह्मपुराणे नवकलेवरम्:** पुरुषोत्तमक्षेत्रस्येतादृशं माहात्म्यं वर्तते यत् विश्वावसुना प्रतिष्ठितप्रतिमाया: परिवर्तनेनापि प्रतिमामाहात्म्यमक्षुर्णं वर्तते यत्तु नवकलेवरसमये क्रियते । ब्रह्मपुराणस्य द्वितीयखण्डे उक्तं यत् ऋषिकृतप्रतिमालिंगादिनाशे तत् स्थाने प्रतिमान्तरं लिंगान्तरं वा तथा न फलजनकम् । अन्यत्रक्षेत्रे दृशं वचनं लिङ्गवापि नास्ति । इन्द्रद्युम्नं प्रति वरदानस्तुति: अभवत् यत् "प्रासादे प्रतिमाभंगे न त्यजामि कदाचनेति" वचनात् पुरुषोत्तमक्षेत्रे तत्स्थाने प्रतिमान्तरस्य वचनविशेषादेव पुण्यहेतुत्वम् । एतदपि नित्याचारप्रदीपनामकधर्मशास्त्रे उल्लिखितम् । अत: नवकलेवरसमये दारुमूर्त्ते: परिवर्त्तनेनापि विग्रहस्याक्षुर्णमहिमा वर्तते ।

**४.४. श्रीमद्भागवदपुराणे नवकलेवरम्:** श्रीमद्भागवते यथा मङ्गला स्वप्नमाध्यमेन भगवत: कृष्णस्य जन्ममार्गं परिष्करोति तथैवात्र दारु-अन्वेषणस्य मार्गं परिष्करोति स्वप्नमाध्यमेन मङ्गला । स्वप्नेश्वरी मन्त्र: यथा-
"स्वप्नवती स्वप्नभोग ध्वं सताखिल दानव । आकर्षण क्रियालोला चाश्रिताभिष्टदायिनी ।।"
दारूपासनया आशु फललाभं भवतीति कथितम् । पुनश्चोपासनामूर्त्तेरष्टप्रकारका अत्र वर्णिता: यत्र दारूपासना अन्यतमा । ज्ञायते यत् दारुमूर्त्तेरुपासना अतिप्राचीना अतिप्रसिद्धा च ।

> "शैली दारुमयी लौही लेप्या लेख्या च सैकती ।
> मृण्मयी मणिमयी चैव प्रतिमाष्टविधास्मृता: ।।" (११.२७.१२)

**४.५. नीलाद्रिमहोदये नवकलेवरम्:** यद्यपि नवकलेवरस्योल्लेखो नीलाद्रिमहोदये कुत्रापि न वर्तते तथापि कासांचित् प्रक्रियाणां वर्णना स्पष्टतया भवत्यत्र । यथा- षडत्रिंशेऽध्याये वनयागविधिरुल्लिखित: । दारुच्छेदनात् प्रागेव वृक्षस्य य: यज्ञात्मकसंस्कार: क्रियते स: वनयागविधिरुच्यते । तथैव सप्तपञ्चाशतेऽध्याये केशवादिन्यास: श्रीवीजयुक्तमातृकान्यास:-स्वरवीजयुक्तमातृकान्यास:-वीजत्रययुक्तमातृकान्यास:-षड्वीजयुक्तमातृकान्यास:- प्रपञ्चमातृका- न्यास:-कलान्यासादीनाञ्च वर्णना भवति । एतानि कार्याणि दारुविग्रहे प्राणप्रतिष्ठासमये क्रियन्ते । अष्टपञ्चाशतेऽध्याये श्रीकण्ठमातृकान्यासविधि: वर्णित: । यत्

> "श्रीकण्ठमातृकान्यासविधिं शृणु महीपते ।
> यस्य श्रवणमात्रेण क्षीणपापोभरेन्नर: ।।"

चतु:सप्ततितमेऽध्याये दारुब्रह्मण: आराधनाय विविधमूर्त्तिनामावाहनादिमन्त्रा: षट्सप्ततितमेऽध्याये दारुब्रह्मण: जीवन्यासविधिश्च वर्णिता: येषामावश्यकता तु नवकलेवरसमये दृश्यते । पुनश्च नवकलेवरसमये लोहितवस्त्रचन्दनकर्पूरकस्तुरीशालनिर्यासपतन्यक्षतचूर्णादीनां मिश्रणेन नूतनदारुविग्रहस्य सप्तावरणरुपायनमपि भवति । एतेषां सविशेषविवरणानि उपलभ्यन्ते नीलाद्रिमहोदयग्रन्थे ।

**४.६.इन्द्रनीलमणिपुराणे नवकलेवरम्:** इन्द्रनीलमणिपुराणे उल्लिखितं यत् काकटपुरग्रामात् दारुसंग्रह: क्रियते । दारुलक्षणमपि अत्र सविस्तरं वर्णितम् । दारुचयनार्थं सर्वेषां लक्षणानामावश्यकता न वर्तते । मुख्यलक्षणानि सन्ति चेत् अपराणि परित्यक्तानि, एकविग्रहार्थमेकाधिकवृक्षाणां सन्धानं भवति चेत् सर्वोत्तमवृक्षस्य चयनं क्रियते ।

**५. उपसंहार:** यद्यपि प्रत्यक्षतया नवकलेवरस्य वर्णना पुराणेषु नोल्लिखिता तथापि अप्रत्यक्षतया एव कथिता। किञ्च नवकलेवरस्य या: प्रक्रिया: सन्ति तेषु काश्चित् प्रक्रिया: पुराणेषु दृश्यन्ते। प्रतिष्ठाप्रदीपनित्याचारप्रदीपमादलापाञ्जिकटकराजवंशावलीप्रभृतिग्रन्थान् आश्रित्य तथ्यमिदं परिशीलयितुं शक्यते।

**परामृष्टग्रन्था**

१. झलकीकर:, वामनाचार्य:, अमरकोश:(महेश्वरटीका), ईष्टर्ण बुक् लिङ्कर्स, जवाहार नगर, दिल्ली, २००७

२. झा, गङ्गानाथः, कटक-राजवंशावली, केन्द्रीय-संस्कृत-विद्यापीठम्, प्रयागः, १९८६
३. सिंहदेवः, श्रीविरमित्रोदयः, नीलाद्रिमहोदयः, सोनपुरष्टेट्, ओडिशा, १९२२
४. मिश्र, प्रफुल्लः कुमारः, पुराणपरम्परा ओ नवकलेवर, प्राची-उपत्यका-शिक्षा-संस्कृति ओ इतिहास-गवेषणा-परिषद, १९९६
५. ब्रह्मपुराणम्, मोतिलाल वनारसीदास, दिल्ली, १९८५
६. पाण्डेयः, रामतेजशास्त्री, पाण्डेयः, राधेमोहनः, श्रीमद्भागवतम् श्रीधरीभावार्थदीपिकाटीकासम्बलितम्, पण्डितपुस्तकालय, राजादरवाजा, काशी, १९७९